# श्रीमद्भगवद्गीता - ध्यान श्लोकाः

ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराण मुनिना मध्ये महाभारतम् ।
अद्वैतामृत वर्षिणीं भगवतीं अष्टादशाध्यायिनीं
अम्ब त्वां अनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ॥

नमोऽस्तुते व्यास विशाल बुद्धे फुल्लारविन्दायत पत्रनेत्र ।
येन त्वया भारत तैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः॥

प्रपन्न पारिजाताय तोत्रवेत्रैक पाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥

सर्वोपनिषदो गावः दोग्धा गोपाल नन्दनः ।
पार्थो वत्सः सुधी र्भोक्ता दुग्धं गीतामृतं महत् ॥

वसुदेवसुतं देवं कंस चाणूर मर्दनम् ।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

भीष्मद्रोणतटा जयद्रथ जला गान्धार नीलोत्पला
शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला ।
अश्वत्थाम विकर्ण घोर मकरा दुर्योधना वर्तिनी
सोत्तीर्णा खलु पाण्डवै रणनदी कैवर्तकः केशवः ॥

पाराशर्य वचः सरोज ममलं गीतार्थ गन्धोत्कटं
नानाख्यानक केसरं हरिकथा सम्बोध नाबोधितम् ।
लोके सज्जन षट्पदै रहरहः पेपीयमानं मुदा
भूयाद्भारत पङ्कजं कलिमलं प्रध्वंसिनः श्रेयसे ॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्द माधवम् ॥

यं ब्रह्मा वरुणेन्द्र रुद्र मरुतः स्तुन्वन्ति दिव्यैः स्तवैः
वेदैः साङ्ग पद क्रमोप निषदैः गायन्ति यं सामगाः ।
ध्यानावस्थित तद्गतेन मनसा पश्यन्ति यं योगिनः
यस्यान्तं न विदुस्सुरा सुरगणाः देवाय तस्मै नमः ॥